# संस्कृतवार्ता:

दिनाङ्क :- 05.08.2025

प्रात: - 06:55

<u>संसद सत्रम्</u>

संसदः उभयोः सदनयोः कार्यान्वयनं ह्यः दिवसावधये स्थगितम् अभवत्। झारखंड मुक्ति मोर्चा दलस्य वरिष्ठ-नेत्रे वर्तमान-सांसदाय शिबू सोरेनाय श्रद्धाञ्जलि -प्रदानानन्तरं राज्यसभा स्थगितीकृता, यस्य ह्यः नव दिल्ल्यां निधनम् अभवत्, अपरत्र च बिहारे विशेष-गहन-पुनरीक्षणाभ्यासम् अवलम्ब्य विपक्षस्य विरोधकारणेन लोकसभायाः कार्यजातमपि बाधितम् अभवत्। ह्यः अपराह्णे द्वि-वादने पूर्व-स्थगनस्य पश्चात् यदा लोकसभायाः कार्यजातम् आरब्धम्, तदा विपक्षि-सांसदानां विरोधे रोषं प्रकटयन्, संसदीय कार्यमन्त्री श्री किरेनरिजिजुः प्रोक्तवान् यत् कार्य-मन्त्रणा समितेः उपवेशने, ऐषमः राष्ट्रिय-खेल-प्रशासन-विधेयके, राष्ट्रिय डोपिंग-रोधि-संशोधन-विधेयके च चर्चा विधानस्य निर्णयः अभिस्वीकृतः आसीत्।

राज्यसभायाः उपसभापतिः हरिवंशः उक्तवान् यत्, शिबू सोरेनः एकः वरिष्ठः प्रतिष्ठितश्च आदिवासी नेता आसीत्, येन आदिवासि-समुदायस्य अधिकार-रक्षार्थम्, तेषाम् उत्थानार्थं च आंदोलने प्रमुख-भूमिका निर्व्यूढा आसीत्।

तदनु सदने सोरेनस्य सम्माने कतिपय-कालं यावत् मौनधारणं कृतम्। ततश्च दिवंगतस्य नेतुः निधने शोकम् व्यक्तीकृत्य, सदनस्य कार्यान्वयनम् पूर्ण-दिवसावधये स्थगितीकृतम् अभूत्। राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्र मोदी अन्ये च गणमान्याः एतस्य वरिष्ठ-नेतुः निधनमभिलक्ष्य शोकं व्यक्तीकृतवन्तः।

प्रधानमन्त्री-परीक्षा पे चर्चा

प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य प्रमुख-परिकल्पना, परीक्षा पे चर्चा इत्यस्मिन् कार्यक्रमे, एकमास-अवधौ नागरिक-सङ्गति-पटले सर्वाधिकं जनानां पञ्जीकरणस्य कृते गिनीस-वर्ल्ड्-रेकार्ड् इति सम्मानं प्रदत्तम् अस्ति। एषा मान्यता माई-गॉव-पटले आयोजितस्य कार्यक्रमस्य अष्टम-संस्करणस्य कालखण्डे त्रि-पंचाशत्-लक्षोत्तर-त्रिकोटि-जनानां पञ्जीकरणं कृत्वा प्राप्तस्य उपलब्धेः प्रमाणम् अस्ति। ह्यः नवदिल्लीनगरे आयोजिते समारोहे आधिकारिकम्, गिनीज वर्ल्ड रिकार्ड, प्रमाणपत्रम् औपचारिकरूपेण प्रदत्तम्।

विदेशमंत्रालय-ऑयल आयात

अमेरिकया यूरोपीय-सङ्घेन च, युक्रेन-सङ्घर्षस्य अनन्तरं रूसदेशात् तैलस्य आयातस्य कारणेन भारतं यत् लक्ष्यीक्रियते तदकारणम् अपि च अन्याय्यम् इति विदेशमन्त्रालयेन

स्पष्टीकृतम्। एकस्मिन् वक्तव्ये मन्त्रालयेन प्रतिपादितं यत्, कस्याश्चिदपि प्रमुख-अर्थव्यवस्थायाः इव भारतं अपि स्वस्य राष्ट्रहितस्य आर्थिकसुरक्षायाः च रक्षणार्थं सर्वाणि आवश्यकानि उपायानि करिष्यति।

फिलीपींस

अद्य नवदिल्ल्यां प्रधानमन्त्रि-श्रीनरेन्द्रमोदिनः अथ फिलीपींस-देशस्य राष्ट्रपतिः फर्डिनेंड आर. मार्कोस जूनियर इत्यस्य च मध्ये उच्चस्तरीया प्रतिनिधिमंडल-संगोष्ठी समायोजिता वर्तते। अवधेयमस्ति यत्-श्री-मार्कोसः भारतस्य पञ्च-दिवसीय-राजकीय-यात्रायाम् वर्तते। फिलीपींसस्य राष्ट्रपतेः पदभार-ग्रहणस्य अनन्तरं राष्ट्रपति-मार्कोसस्य एषा प्रथमा भारत-यात्रा वर्तते। अस्याः यात्रायाः अवसरे, राष्ट्रपतिः मार्कोसः राष्ट्रपतिं द्रौपदी-मुर्मु-वर्याम् अपि सम्मिल्ल्य सम्भाषणम् करिष्यति। विदेश मन्त्री डॉ. एस. जयशंकरः विश्वासं प्रकटितवान् यत् द्वयोः नेत्रोः मध्ये सम्भाव्यमाना वार्ता, द्वयोः देशयोः मध्ये द्विपक्षीयसम्बन्धान् दृढयति। अत्रान्तरे एकस्मिन् वक्तव्ये, फिलीपींसस्य राष्ट्रपतिः भारतम् एकं महत्त्वपूर्ण मित्रराष्ट्र प्रत्यपादयत्। श्री-मार्कोसः अस्मिन् विषये बलं प्रदत्तवान् यत् सामयिक-लोकतान्त्रिक मूल्यानि, सामुद्रिकं हितं, क्षेत्रीय-शान्तिः, भारतेन सह गहनः, व्यापकः, सार्थकश्च द्विपक्षीय सहयोगः अपेक्ष्यते इति।

क्रिकेट-क्रीड़ा

क्रिकेट-क्रीडायां, भारतेन ह्यः, टेस्ट इति क्रिकेट्-निकष-स्पर्धायाः अन्त्य-चक्रे, षट् धावनांकैः रोमाञ्चकः विजयः प्राप्तः। एंडरसन-तेंदुलकर ट्रॉफीति स्पर्धायां इंग्लैंड-दलं विरुध्य

लंदन-नगरस्य ओवल क्रीडाङ्गणे क्रीडिता पञ्च-स्पर्धा-शृङ्खला द्वि-द्वि-अंकैः समतां प्राप्ता। तत्रैव इंग्लैंड-दलेन पञ्चम-दिवसस्य स्वीये द्वितीये क्रीडा-पर्याये सप्त-षष्ट्युत्तर-त्रिशत-धावनांकान् अर्जयित्वा पराजयो अवाप्तः। मोहम्मद सिराजः पर्यायश्रेष्ठः घोषितः, यत्र हि शुभमन् गिल् अथ ह्यारि ब्रूक् च शृंखलाश्रेष्ठौ घोषितौ।